Text begins : ...तिचिंत्यतो आसु तदानाडीश्वित्यादि सप्तमी निर्देशात् ताभिः प्रत्यवसृप्ये(?) त्यादि समुच्चय निर्देशाच्च संशयमाह तत्र किमिति। प्रयोजनमाह एतदत इति। वस्तुतो ब्रह्मण एवसतो जीवस्य तद्वैपरीत्यं भ्रमः..............।

It ends : परिहरति तेषां नित्यत्वादित्यादिना। यस्या(स्मा?)-द्वासाक्षात्कारस्य.......संशयोस्ति प्राप्नुयामहं फलं न वेति। तस्य ब्रह्म (देवो?) प्राप्तिर्भवेदित्यर्थः। साक्षात-कारेणेहो.... भूत्वादेवानप्येति प्राप्नोति। काम्यवान। प्रतीकोपास्तीनामुपास्तित्वादहं ग्रहोपास्तिवद्विकल्प.....।

The first Colophon is seen in Page 45A : इति श्रीमत्परमहंस परिव्राजकस्य श्रीमदनुभवानंद पूज्यपादशिष्य भगवदमलानंदस्य व्यासाश्रम परनामधेयस्य कृतौ बेदांतकल्पतरौ तृतीयाध्यायस्य द्वितीयः पादः ॥

523

I.M. No 10,295

Title : The same

By : Amalānanda

Substance : C.M.P.

Size : 25 cm X 10.5 cm

Character : Nāgarī

Folia : 3-6,8,10-25

Lines in a page : 14, 15
Letters in a line : 64
Condition : Old, torn, damp, hazy, incomplete.
Date : Nil
Text begins : ...गुर्वच मत्या.......दर्शनात् अतस्तत्ररुपांतरा....नुरेव केवलं प्रत्यगात्मनि.. चिति... स्वभावत्वा स्वयं प्रकाशमाने ब्रह्मस्वरुपान..सस्यामन्य निमित्वात्रद्गत निसर्त(?) सिद्धविद्य... प्रतिबंधातेव....।
It ends : शास्त्रांबुधेः पारंगता द्विजेंद्रा
यद्दत्तचामीकरवारिराशेः।
ज्ञातुं न पारं प्रभवंति तस्मिन्
कृष्णे क्षितीशे भुवनैकवीरे ॥६॥
भ्रात्रा महादेव नृपेण साकं
पाति क्षितिं प्रागिव धर्मसुन्नौ(?) ।
कृतो मयायं प्रवरः प्रबंधः
प्रगल्भ. वाचस्पति भावभेदी ॥
Colophon : इति श्रीपरमहंस परिव्राजक श्रीमदनुभवानंद पूज्यपाद-शिष्य भगवदमलानंदस्यव्यासाश्रमा परनामधेयस्य कृतौ बेदांतकल्पतरौ चतुर्थाध्यायः।

524

I.M. No 757

Title : वेदांतपरिभाषा टीका
(Vedāntaparibhāṣā with ṭīkā)
By : *Text*-Dharmarājādhvarīndra, *Com:* Śivadatta.
Substance : C.M.P.
Size : 30.5 cm X 12 cm
Character : Nāgarī
Folia : 3 By Counting +1 extra.
Lines in a page : 18,20

Letters in a line : 49
Condition : Old, damp, torn, incomplete
Date : Nil
Text begins : श्रीगणेशाय नमः । वेदांतपरिभाषायां प्रत्यक्षखंडे ज्ञप्तिगत् प्रत्यक्षसामान्यलक्षण निरूपणांते।
It ends : इति प्रपंचगत मिथ्यात्वस्य मिथ्यात्वेऽपि अद्वैत क्षति विरहसमर्थन प्रकारः ।
There are 4 lines only of Vedāntaparibhāṣā (text) followed by the commentary by Śivadatta.

525

I.M. No 4045

Title : वेदांतपरिभाषा
(Vedāntaparibhāṣā)
By : Dharmarāja Dīkṣita
Substance : C.M.P.
Size : 23 cm X 8 cm
Character : Nāgarī
Folia : 1-13
Lines in a page : 16,17,18
Letters in a line : 58
Condition : Fair, torn, complete.
Date : Saṁvat 1769
Text begins : श्रीमहागणपतिर्जयतितमां ॥
यदविद्याविलासेन भूतभौतिकसृष्टयः।
तन्नौमि परमात्मानं सच्चिदानंद विग्रहं ॥१॥
ब्रह्मबोधायमंदानां वेदांतार्थ(।?) वलंविनी ।
धर्मराजाध्वरीदेंण परिभाषा वितन्यते ॥२॥
It ends : तदुक्तमाचार्यवाचस्पति मिश्रैः।
उपासनादि संसिद्धितोषितेश्वर चोदितं ।

अधिकारं समाप्यैते प्रविशंति परं पदमिति । एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेका विद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया। तदेवंब्रह्मज्ञानान्मोक्षश्चानर्थनिवृत्तिर्निरतिशय ब्रह्मानंदावाप्तिश्चेति सिद्धं प्रयोजनं ।

Colophon : इति श्रीधर्मराज दीक्षित विरचिता वेदांतपरिभाषा समाप्ता ।

Post Colophon : संवत् १७६९ शुभ..........श्रीराम राम राम श्री ।

526

I.M. No 4826

Title : The same

By : Dharmarājādhvarindra

Substance : C.M.P.

Size : 24.5 cm X 11.5 cm

Character : Nāgarī

Folia : 1-37

Lines in a page : 9

Letters in a line : 37

Condition : Fair, torn, mouse-eaten, incomplete.

Date : Nil

Text begins : श्रीगणेशय नमः ।
यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानंदविग्रहं ॥१॥
यदंतेवासि पंचास्यैर्निरस्ताभेद वारणाः।
तं प्रणौमिनृसिंहाख्यं यतींद्र परमं गुरुं ॥२॥

It ends : अवस्थांतरे इंद्रियाभावान्नातिव्याप्तिः। इन्द्रियजन्यं ज्ञानं चांतःकरण वृत्तिः स्वरुपज्ञानस्यानादित्वात्। साचांतःकरणवृत्तिरावरणाभिर्भवार्थेत्येकं मतं। तथाहि। अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतंन्यस्य जीवरु............।

527

I.M. No 10,286

Title	:	The same
By	:	Unknown
Substance	:	C.M.P.
Size	:	35 cm X 13.5 cm
Character	:	Nāgarī
Folia	:	4-12, 12,13,14,14-15.
Lines in a page	:	13,14,15
Letters in a line	:	68
Condition	:	Old, damp, damaged by worm-eaten, incomplete.
Date	:	Nil
Text begins	:	.....इत्यादि श्रुतौभायाभिरिति बहुवचनस्य मायागत शक्ति विशेषाभिप्रायतया सत्वरजस्तमो रूप गुणाभिप्रायतयाचोपपत्तेः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं तरत्य विद्यां विततां हृदि यस्मिन्निवेशिते ।
It ends	:	.......तथाहि व्रीहिभिर्यजेत दध्ना जुहोतीत्यादाविव मननिदिध्यासनयोरंगत्वेन काचित्तृतीया श्रुतिरस्ति-नापि बर्हिर्देव सदानंददामीत्यादि मंत्राणां बर्हि खण्डन प्रकाश(रो?) न सामर्थ्यवत्किंचिल्लिंगमस्तिनापि प्रदेशान्तर पठित प्रवर्ग्यस्याग्निष्टोमे प्रपृणक्ति.......।

528

I.M. No 10,743

Title	:	**सटीक वेदांतपरिभाषा** (Vedāntaparibhāṣā with ṭīkā)
By	:	Dharmarājādhvarindra, *Com*-Śivadatta
Substance	:	C.M.P.
Size	:	24.5 cm X 8.5 cm

Character	:	Bengali (Nāgarī)
Folia	:	24 & 6 By Counting
Lines in a page	:	6,8,9
Letters in a line	:	57
Condition	:	Fair, torn, damp, pages are not in order, incomplete.
Date	:	Nil
Text begins	:	उच्यते यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपारम्भः शरीरस्यमुखाधिकरणावछेदकत्वात्.....।
It ends, P-23	:	.......अस्मिन् पक्षे च मिथ्यात्व लक्षणे पारमार्थिकत्वावच्छिन्न प्रतियोगिकत्वमत्यंताभाव इति विशेषेण द्रष्टव्यं तस्मात् उपपन्नमित्यानुमानमिति इत्यनुमान परिछेदः समाप्तः ।
Com. begins	:	... अविद्यापरिणामस्या विद्याधिष्ठा(न?)-माश्रित चैतन्याधस्त तदेवछेदक पुरोवर्त्तितादात्म्य प्रत्ययोपपत्तिरित्याशयेन समाधत्ते उच्यते.....।
It ends, Com	:	रुपेण व्यवहारिकत्वेन रुपेण तथाचैतत् पक्षे मिथ्यात्वलक्षणे इदं विशेषणं देयमित्याह। तस्मिन्निति। मिथ्यात्वानुमानोपपादनमुपसंहरति तस्मादिति।
Colophon	:	इति श्रीमत्परमहंसपरिव्राजकाचार्य बालगोपाल तीर्थ श्रीपाद शिष्य तदवंशावतंस रामकुमार सूत धनपति सूरिसूत शिवदत्त विरचिता परिभाषार्थ दीपिकायामनुमान परिछेदः समाप्तः।

529

I.M. No 1561

Title	:	**वेदांतमंत्र विश्रामतोपनिषत्** (Vedāntamantra Viśrāmatopaniṣat)
By	:	Śaṅkarācārya
Substance	:	C.M.P.

Size	:	20 cm X11.5 cm
Character	:	Nāgarī
Folia	:	1-17
Lines in a page	:	10,11, 12
Letters in a line	:	29
Condition	:	Very old, torn, damaged by worm-eaten, complete.
Date	:	Saṁvat 1706
Text begins	:	... ॐ मित्येतदक्षर मिदं सर्वंतस्योपव्याख्यानं भूतं भवद्भविष्यदिती सर्वमोंकार एव यच्चान्य त्रिकालातीतं तदप्योंकार एव सर्वह्ये तद्ब्रह्मायमात्मा ब्रह्म सोयमात्मा-चतुष्याज्ञागरित.....।
It ends	:	मंध्यामदलेशामवर्ण यदा विश्रामते मनः ॥ तदा सर्वगुणज्ञानं चैतन्यं च मतिर्भवेत ॥१०॥ अन्न(?)मांत्रे नराः सर्वे सर्वः पापैः प्रमुच्यते ॥ जे पठंति च कर्त्तव्यं च साजोय्यं पदविर्भवेत ॥११॥
Colophon	:	इति श्रीमत्संकराचार्यविरचितः वेदांतमंत्रविश्रामतो-पनिषत्समाप्तः।
Post Colophon	:	शुभमस्तु..........संवत् १७०६ श्रीरामः कृष्णाय नमः॥

530

I.M. No 5121

Title	:	वेदांतरत्नम् (Vedāntaratnam)
By	:	Kamalākara Bhaṭṭa
Substance	:	C.M.P.
Size	:	28 cm X11.5 cm
Character	:	Nāgarī
Folia	:	4-32, 37-52, 54-58
Lines in a page	:	9,10
Letters in a line	:	39

Condition : Very old, damaged by torn; incomplete .

Date : Nil

Text begins : ....पाणिकादक्षविहिता ब्रह्मगीतिका। गेयमेतत्तदभ्यासकरणं मोक्ष संज्ञितं। वीणा वादनतत्वज्ञः श्रुतितालाति विशारदः। तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति। सप्तस्वरे बुद्धाविंशति श्रुतयः। षड्डमध्य..पंचमाः प्रात्येकं चतुः श्रुतयः ।

It ends : श्रुतिरपि । अंतर्वहिश्च तत्सर्वं व्याप्यमारापणः स्थितः। गीताखपि। "स तया श्रद्धया युक्तस्तस्याराधनमीहते"। लभते च ततः कामान्मयैव विहितान्हितानिति। रामकृष्ण तनुजेन कमलाकर शर्मणा । योऽत्रश्रमः कृतस्तेन प्रीयतां नाटकांतकः।

Colophon : इति श्रीमज्जगद्गुरु मीमांसक रामेश्वर भट्ट सूरिसूनु नारायण भट्टसुत रामकृष्ण भट्टात्मज महामहोपाध्याय मीमांसककमलाकर भट्टकृतं वेदांतरत्नं समाप्तं ॥

Post Colophon : शुभमस्तु। श्रीकृष्ण जयेति ॥

531

I.M. No 878

Title : **वेदान्तशिखामणिः टीका**
(Vedāntaśikhāmaṇi with ṭīkā)

By : Rāmakṛṣṇa Adhvarīndra, son of Dharmarāja Adhvarīndra.

Substance : C.M.P.

Size : 27 cm X 12 cm

Character : Nāgarī

Folia : 1-118

Lines in a page : 10

Letters in a line : 43

Condition : Old, torn, worm eaten, incomplete

Date	:	Nil
Text begins	:	श्रीगणेशाय नमः । नैदाघ भानुकिरणेष्विव वारिपूरः सर्वो विभाति यदबोधवशात्प्रपंचः। मालाफणीव च निमीलति यत्प्रबोधात् तत् ब्रह्म नौमि सुखमद्वयमात्मरूपं ॥१॥
It ends	:	दिगादि देवतानां च प्राणिकर्मवशेनान्यत्रापि प्रेरण संभवात् तथा श्रोत्रेण कर्णौ च दिशे इत्यादि भागवत् वचने च तत्र प्रमाणं, वस्तुतस्तु चक्षु श्रोत्र प्राणरसतत्वगिंद्रियाणां क्रमेणादित्य दिक् पृथिवी वरूण वा....। A Commentary on the Vedānta-paribhāṣa.

532

I.M. No 5118

Title	:	The same
By	:	Rāmakṛṣṇādhvarīndra
Substance	:	C.M.P.
Size	:	24 cm X 10.5 cm
Character	:	Nāgarī
Folia	:	2-8, 10-62 & 64
Lines in a page	:	10, 11, 12
Letters in a line	:	43
Condition	:	Fair, torn, worm-eaten, incomplete
Date	:	Nil
Text begins	:	....वाद विषयी भूतानि भूत भौतिकानि स्वोपादान गोचरापरोक्षज्ञानवत्प्रणीतानि कार्यत्वाद् घटवत्, न च परिदृश्यमान पृथिव्यादौ प्रत्यक्षेण कार्यत्वसिद्धौ अतींद्रिये तदसिद्धेः भागासिद्धो हेतुरिति वाच्यं.....।
It ends	:	....इति कदंवमुकुलन्याय आदि शब्दार्थः भ्रमत्व

कल्पनेति नेदं रज(त?) मिति वन्नायं भेरी शब्दे श्रुत इति भावेन तस्य भ्रांतत्व कल्पनं न युक्तमिति परमत प्रकृतमुपसंहरति तदेवमिति प्रत्यक्ष प्रमा(णां)नि रूपणात्तत्करणत्वेन प्रत्यंक्ष प्रमाणं निरुपितमित्यर्थः।

Colophon : इति श्रीधर्मराजाध्वरींद्रात्मज श्रीरामकृष्णध्वरि (रीन्द्र?) विरचिते बेदांतशिखामणै प्रत्यक्ष परिछेदः। एवं सर्वप्रमाणज्येष्ठतया प्रथमं प्रत्यक्ष प्रमाणं.......

....

नानुमिति करणत्वमपि लक्षणं तद् घटकानुमिते- र्लक्षणाभावेन दुर्निरुपणत्वात् न च व्याप्ति विशिष्ट पक्षधर्मता ज्ञा......।

533

I.M. No 9319

Title : वेदांतसारः
(Vedāntasāraḥ)

By : Sadānanda Sarasvatī

Substance : C.M.P.

Size : 24.5 cm X10.5 cm

Character : Nāgarī

Folia : 1-12

Lines in a page : 10, 11

Letters in a line : 37

Condition : Old, damp, damaged by torn, complete.

Date : Saṁvat 1591

Text begins : श्रीनृसींहाय नमः।
अखण्ड सच्चिदानंदमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये ।१।
अर्थतोऽप्यद्वयानंदानतीतद्वैतभानतः ।
गुरुनाराध्य वेदांतसारं वक्ष्ये यथामतिः ।२।
वेदांतो नामोपनिषत्प्रमाणं।..............।

It ends	:	....तदवसाने प्रत्यगानंद परब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्य संस्काराणामपि विनाशात्परम कैवल्यमानंदैकरसमखिलभेद प्रतिभासरहितमखण्ड ब्रह्मावतिष्टते। न तस्य प्राणा उत्क्रामंति अत्रैव समवलीयंते विविक्तश्च विमुच्यत इति चैवमादि श्रुतेः।
Colophon	:	इति वेदांतसारः समाप्तः ।
Post Colophon	:	शुभंभवतु, संवत् १५९१ वर्षे.....तथापुत्रपौत्राणां ॥

534

I.M. No 9424

Title	:	The same
By	:	Sadānanda Sarasvatī
Substance	:	C.M.P.
Size	:	29.5 cm X13.5 cm
Character	:	Nāgarī
Folia	:	1-9B
Lines in a page	:	14
Letters in a line	:	41
Condition	:	Fair, torn, complete.
Date	:	Nil
Text begins	:	श्रीगणेशाय नमः । श्रीसद्गुरूपरमानंदाय नमः । अखण्ड सच्चिदानंदमवाङ्मनसगोचरम् । आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये।१। अर्थतोऽप्यद्वयानंदानतीताद्वैत भावनातः गुरुनाराध्य वेदांतसारं वक्ष्ये यथामतिः।२।
It ends, P-9B	:	करणाभासादीनामवभासकः सन् प्रत्यगांनंदे परब्रह्मणि प्राणे लीने सति अज्ञान तत्कार्य संस्काराणामपि विनाशात् परं कैवल्यभावैकरसमखिलभेदप्रतिभा (स?)रहितमखंडं ब्रह्मावतिष्ठते। न तस्य प्राणा उत्क्रामंत्यत्रैव समलीयंते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः। श्रुतेः।

Colophon : इति श्रीमत्परमहंसपरिब्राजकाचार्य श्रीसदानंद. सरस्वतीकृतौ वेदांतसारः समाप्तं॥

535

I.M. No 10,187

Title : The same
By : Paramahaṁsa Parivrājakācārya
Substance : C.M.P.
Size : 23 cm X 8 cm
Character : Nāgarī
Folia : 1-8
Lines in a page : 13
Letters in a line : 53
Condition : Fair, torn, complete.
Date : Nil
Text begins : श्रीमहागणपतिर्जयतितमां।
श्रीशंकरचरणौ भजे।
अखण्ड सच्चिदानंदमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये ।१।
अर्थतोऽप्यद्वयानंदानतीतद्वैतभानतः
गुरुनाराध्य वेदांतसारं वक्ष्ये यथामतिः ।२।
It ends : परमकैवल्यमानंदैक रसमखिलभेद प्रतिभास रहितम-खंडं ब्रह्मावतिष्टते। न तस्य प्राणा उत्क्रमंत्यत्रैव समवलीयंते। विमुक्तश्च विमुच्यते इत्यादि श्रुतेः॥
Colophon : श्री । इति श्रीमत्परमहंसपरिब्राजकाचार्य विरचिते देदांतसार प्रकरणं। श्री ।

536

I.M. No 10,897

Title : The same
By : Unknown

Substance	:	C.M.P.
Size	:	29.5 cm X11 cm
Character	:	Bengali (Nagarī)
Folia	:	1-7
Lines in a page	:	6
Letters in a line	:	38
Condition	:	Fair, damp, incomplete.
Date	:	Nil
Text begins	:	श्रीगणेशाय नमः। अखण्ड सच्चिदानंदमवाङ्मनसगोचरम् । आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये।१। अर्थतोऽप्यद्वयानंदानतीत द्वैतभानतः । गुरुनाराध्य वेदांतसारं वक्ष्ये यथामतिः।२।
It ends	:	.......शक्तिद्वयवद ज्ञानोपहित चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधि प्रधानतयोपादनं च भवति यथा लुतातन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीर प्रधानतयोपादानं च भवति। तद्वत् तमः प्रधानविक्षेप शक्तियदज्ञानोपहित चैतन्यादाकाश आकाशा........

537

I.M. No 771

Title	:	वेदांतसारः, सुबोधिनी टीका सहिता (Vedāntasārah, with Subodhinī Commentary)
By	:	Nṛsiṁha Sarasvatī.
Substance	:	C.M.P.
Size	:	27.5 cm X 12 cm
Character	:	Nāgarī
Folia	:	1-27
Lines in a page	:	15, 16
Letters in a line	:	51

Condition	:	Old, damp, mouse-eaten, incomplete
Date	:	Nil
Text begins	:	श्रीगणेशाय नमः । रामानंद गुरूं नत्वापरमानंद(म?) द्वयम् । वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुवोधिनीम् । इह खलु कश्चिन्महापुरुषो नित्याध्ययन विध्यधीतसकल वेदराशीनां.......।
It ends 27B	:	न च मुक्तानामपिवसि(शि?)ष्ठ भीष्म प्रभृतीनामपरोक्ष ज्ञानिनां पुनर्देहांतर श्रवणात्केवलं ज्ञानोत्पत्ति समय एवाल्प ज्ञानामस्माकं मुक्तिर्भवति इति कथं विश्व...।

538

I.M. No 2909

Title	:	The same
By	:	Sadānanda Bhagavat, *Com*-Nṛsiṁha Sarasvatī
Substance	:	C.M.P.
Size	:	35 cm X 19 cm
Character	:	Nāgarī
Folia	:	1-23
Lines in a page	:	16,20
Letters in a line	:	62
Condition	:	Fair, torn, worm eaten, complete.
Date	:	Saṁvat 1900
Text begins	:	अखंडं सच्चिदानंदमवाङ्मानसगोचरं ॥ आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये ॥१॥
It ends	:	आनंदैकरसमखिलभेदबुद्धि प्रतिभास रहितमखंड ब्रह्मावतिष्ठते । न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते, विमुक्तश्च विमुच्यत इत्यादि श्रुतेः ।
Com. begins	:	श्रीगणेशाय नमः।

रामानंदं गुरुं नत्वा परमानंदमद्वयं ।
वक्ष्ये वेदांतसारस्य टीकां नाम्नासुबोधिनीम् ॥१॥
इह खलु कश्चिन्महापुरुषो नित्याध्ययन विध्यधीत सकल.......।

It ends, Com : .....तस्मात् सुष्ठुक्तं विमुक्तश्च विमुच्यत इति नित्यशुद्ध परिपुर्णमद्वयं सच्चिदात्मंकमखंडमक्षरं सर्वदासुखमबोध तत्कृतैर्वर्जितं सदहस्मि तत्परं।१।
गोवर्द्धन प्रेरणया विमुक्तक्षेत्रे पवित्रे नरसिंहयोगी ।
वेदांतसारस्य चकार टीकां सुबोधिनीं विश्व(प?) तेः पुरस्तात्।

Colophon : इति श्रीपरमहंस परिव्राजकाचार्य श्रीमत् कृष्णानंद भगवत्पूज्यपद शिष्य नृसिंह सरस्वती कृता वेदांतसार टीका समाप्ता ।

Post Colophon : सं १९०० फाल्गुने ।

539

I.M. No 9889

Title : The same
By : Nṛsiṁha Sarasvatī
Substance : C.M.P.
Size : 25 cm X 11.5 cm
Character : Nāgari
Folia : 1-8, 11-15
Lines in a page : 13
Letters in a line : 40
Condition : Old, torn, damp, worm-eaten, incomplete.
Date : Saṁvat 1717
Text begins : ॐ नमः परमात्मने ।
कृष्णानदंगुरुं नत्वा परमानंदमद्वयं ।
वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबोधिनीं ॥१॥

इह खलु कश्चिन्महापुरुषो नित्याध्ययन विध्यधी-
तसकलवेदराशीनां चिन्मात्राश्रय तद्रुपाद्वयानंद.......।

It ends : गोवर्द्धनप्रेरणया विमुक्तक्षेत्रे पवित्रे नरसिंहयोगी ।
वेदांतसारश्चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात्॥

The following verse indicats the date of the work is added at the end : जाते पंचशताधिके दशशते संवत्सराणां पुनः
संजाते दशवत्सरे प्रभुवरश्रीशालिबाहे शके ॥
प्राप्ते दुर्मखवत्सरे शुभशुचौ मासेऽनुमत्यां तिथौ
प्राप्ते भार्गववासरे नरहरिष्टीकां चकारोज्वलां ॥१॥
Śaka 1510=1588A.D.

Colophon : इति श्रीपरमहंसपरिब्राजकाचार्य श्रीमत्कृष्णानंद भगवत्पूज्यपाद शिष्य नृसिंह सरस्वतीकृता वेदांतसार टीका समाप्ता ॥

Post Colophon : ॐ स्वस्ति श्रीसंवत् १७१७ प्रवर्त्तमाने.........शुभमस्तु सर्वजगतः ॥

540

I.M. No 9168

Title : **वेदांतसारटीका (?)**
(Vedāntasāraṭīkā?)

By : Unknown

Substance : C.M.P.

Size : 26 cm X 11 cm

Character : Nāgarī

Folia : 1-15

Lines in a page : 12

Letters in a line : 45

Condition : Old, torn, worm-eaten, incomplete.

Date : Nil

Text begins : ॐ श्रीमहागणपतये नमः।
ॐ श्रीमहारुद्राय नमः। श्रीगुरवे नमः। ॐ प्रारप्सितस्य

ग्रंथस्य निर्विघ्नेन परिसमाप्तये प्रचयगमनाय च....
वेदता(?) तत्त्वानुसंधानात्म(क?) तु मंगलमाचरति।
अखंडेति । आत्मानमाश्रयेनुसंदधे तथाचात्मैव देवता:...।

It ends : 15B : वृत्ति व्याप्येति। विशिष्ट शब्दादि प्रमाणवलात्त-त्तद्विषयाकारा धी समुन्मेषाभिव्यक्तत्वं वृत्ति व्याप्यत्वं। वाह्येंद्रिय संनिकृष्टार्थाकरवाह्यधी परिणामावच्छिन्न-चिदंशकृतप्राकद्या(?) श्रयत्वं फलव्याप्यत्वमिति भेद:। इंद्रियद्वाराबहिर्नि: सृतांत: करणपरिणा..................।

541

I.M. No 9593

Title	: **सटीक वेदांतसार:** (Vedāntasāraḥ with ṭīkā)
By	: Sadānanda Sarasvatī
Substance	: C.M.P.
Size	: 14.5 cm X 6.5 cm
Character	: Nāgarī
Folia	: 1-13, 15-43, 51, 54, 55, 57-68
Lines in a page	: 8
Letters in a line	: 36
Condition	: Fair, torn, damp, incomplete.
Date	: Nil
Text begins	: अखंडं सच्चिदानंदमवाङ्मानसगोचरं ॥ आत्मानमखिलाधारमाश्रयेऽभीष्ट सिद्धये ॥१॥
It ends	: तत्व साक्षात्कारवान् कथं तत्राह॥
Com begins	: श्रीगणेशाय नम:। मायारुप वसुंधरातनय या(?) युक्तं परं योगिनां। सत्यानंद विदम्बुधिं विहरणस्थानं वपु: सुंदरं॥
It ends, Com	: .....पूर्व पूर्व वासनया क्रिय क्रियमाणानि कर्माणि भुज्यमानानि ज्ञान विरुद्धारब्धफलानि च पश्यन्नपि वाधितत्वात्परमार्थतो न पश्यति ।

542

I.M. No 8042

Title : वेदांतसारसंग्रहः
(Vedāntasārasaṁgrahaḥ)
By : Unknown
Substance : C.M.P.
Size : 17 cm X 10 cm
Character : Nāgarī
Folia : 1-10
Lines in a page : 11
Letters in a line : 25
Condition : Fair, torn, damp, complete.
Text begins : श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।
श्रीभगवानुवाच ।
कैलासशिखरे वासं देवदेवजगद्गुरुं ।
प्रणम्य ईश्वर स्वामि हर वचनमब्रवीत् ॥१॥
It ends : ब्रह्माविष्णुस्तथा रुद्रध्यानक्रिया व्यवस्थितौ।
तस्मादहं हरिध्यानयोगादेव महेश्वर ॥५९॥
Colophon : इति श्रीमत् वेदांतसारसंग्रहे योगशास्त्रे उपनिषत्सु ब्रह्मविद्यायां हरिर्हरसंवाद संपूर्णमस्तु ।

543

I.M. No 879

Title : वेदान्तसूत्रम्
(Vedāntasūtram, only the sūtras)
By : Bādarāyaṇavyāsa
Substance : C.M.P.
Size : 21 cm X 14 cm
Character : Nāgarī

Folia	:	1-14
Lines in a page	:	12, 13
Letters in a line	:	20
Condition	:	Old, torn, damp. complete
Date	:	Nil
Text begins	:	श्रीगणेशाय नमः । ॐ अथातो ब्रह्मजिज्ञासा ।१। जन्माद्यस्ययतः । अ। अ ।२। शास्त्रयोनित्वात् । अ ।३। (तत्तु?) समन्वयात् ॥
It ends	:	दर्शयतश्चैवं प्रत्यक्षानुमाने ।२०। भोगमात्रसाम्य लिंगाच्च ।२१। अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।२२।
Colophon	:	इति वेदांतसूत्रेषु चतुर्थोध्यायः समाप्तः ।
Post Colophon	:	श्रीरामाय नमः ॥ श्रीकृष्णाय नमः । शिवाय नमः॥

544

I.M. No 4833

Title	:	वेदान्तसूत्र मुक्तावली (Vedāntasūtra Muktāvalī)
By	:	Brahmānanda Sarasvatī
Substance	:	C.M.P.
Size	:	32 cm X 12.5 cm
Character	:	Nāgarī
Folia	:	61-103
Lines in a page	:	11
Letters in a line	:	47
Condition	:	Fair, torn, pages wanted, generally incorrect, incomplete.
Date	:	Nil
Text begins	:	..णादिरन्मानपेक्षोपि कदाचित् क्षीरादिरुपेण परिणमते तथा प्रधानतत्राह अन्यत्राभावाच्चन तृणादिवदिति क्षीरादि परिणामस्यान्यत्र वलीवर्द्दादावभावाच्चकाराद्धे-

त्वादि जठर संबंधस्यै वापेक्ष्यत्वाम्रानपेक्षतया तृणादि दृष्टांतः.....।

It ends : ......एवं सन्यासपूर्वकं प्रणवे ब्रह्मोपासकरुपस्य विदुषोप यज्ञ उक्तोपासना रूपस्तस्य यजमानेतु सत्यादि-भावस्तादृश विदुष आत्म श्रद्धादावारोपनीयो विदुषः शिखा यज्ञस्य वेदो न दर्भचयविशेषः शमपि-त्तायश्रुदत्ते(?)त्याद्यर्थ के पुरु ....।

The first Colophon is seen in Page 84B : इति श्रीपरमानंद सरस्वती पूज्यपादशिष्य ब्रह्मानंद सरस्वती विरचिते वेदांतसूत्रमुक्तावल्यां द्वितीयाध्यायः समाप्तः।

545

I.M. No 4846

Title : The same

By : Brahmānanda Sarasvatī

Substance : C.M.P.

Size : 32.5 cm X 12.5 cm

Character : Nāgarī

Folia : 4-36

Lines in a page : 11

Letters in a line : 58

Condition : Old, torn, damp,. worm-eaten, incomplete

Date : Nil

Text begins : .....षोवाव यज्ञत्तस्य(?) यानि चतुर्विंशति वर्षाणि तत्प्रातः सवनमथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनं अथयान्यष्ट चत्वारिंशद्वर्षाणि ततत्तीयं(?) सवनं...........।

It ends : ......इमं मानवमावर्त्तनावर्त्तते तेषामिह न पुनरावृत्ति नित्यादि श्रुतिषु इममिति इहेति शब्दाभ्यां कल्पांतरे

आवृत्ति लाभादत एवामृतत्वमपि श्रौतं गौणमेवेत्यतत आह्वानावृत्तिः शब्दादनावृत्तिं शब्दादिति विदुषः कल्पांतरे प्य.............।

The Colophon is seen in Page 23A : इति श्रीपरमहंसपरिव्राजक परमानंद सरस्वती पूज्यपाद शिष्य ब्रह्मानंद सरस्वतीरचित वेदांतसूत्र मुक्तावल्यां तृतीयोऽध्यायः।

546

I.M. No 821

Title	:	वेदांतसंज्ञाप्रकरणम् (Vedāntasaṁjñāprakaraṇam)
By	:	Unknown
Substance	:	C.M.P.
Size	:	31 cm X 11 cm
Character	:	Nāgarī
Folia	:	1-21
Lines in a page	:	8, 10
Letters in a line	:	39
Condition	:	Fair, torn, complete
Date	:	Nil
Text begins	:	ओं श्रीगणेशाय नमः । श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः । वेदांतसंज्ञाः प्रत्येकं निरूप्यंते यथावि (?) मतिः ॥ अध्यारोपापव (वा?) दाभ्यां निष्प्रपंचं प्रपंच्यत इति वृद्धवचनंअत्राध्यारोपो नाम वस्तुन्यवस्त्वारोपः ।
It ends	:	अधिष्ठानमात्रपर्यवशेषणमपवादः । तथा च सर्वप्रपंच-रहितं ब्रह्माहमस्मीति प्रत्यगभिन्नब्रह्मज्ञानान्मुक्तिरिति सिद्धं ॥
Colophon	:	इति श्रीसंज्ञाप्रकरणं समाप्तम् ।
Post Colophon	:	श्री शुभमस्तु ॥ श्री ॥ रा॥ म॥ जी॥ श्री ॥

547

I.M. No 10,564

Title	:	The same
By	:	Unknown
Substance	:	C.M.P.
Size	:	31.5 cm X 13.5 cm
Character	:	Nāgarī
Folia	:	1-17
Lines in a page	:	13,14,15
Letters in a line	:	36
Condition	:	Fair, torn, damp, complete
Date	:	Saṁvat 1915
Text begins	:	ओं श्रीगणेशाय नमः । श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः । वेदांतसंज्ञाः प्रत्येकं निरूप्यंते यथामतिः ॥ अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति वृद्धवचनमत्राध्यारोपो नाम वस्तुन्यवस्त्वारोपः वस्तु सच्चिदानंदात्मकं ब्रह्म ।
It ends	:	तथा चासंगाद्वितीय ब्रह्म प्रतिपादके वेदांतशास्त्रे बृद्धवचनमनुसृत्याध्यारोपवशात्संज्ञाः संतीति प्रतिपादितं संप्रत्यपवादो निरुप्यते अधिष्ठानमात्रपर्यवशेषणमपवादः। तथा च सर्वप्रपंचहरितं ब्रह्माहमस्मीति प्रत्यगभिन्न ब्रह्मज्ञानान्मुक्तिरिति सिद्धम् ।
Colophon	:	इति संज्ञाप्रकरणं समाप्तम् ।
Post Colophon	:	सं १९१५।

548

I.M. No 10,294

Title	:	**वेदांतस्यमंतक (कालतत्वनिरुपणम्)** (Vedāntasyamantaka (Kālatattva-Nirūpaṇam)

By	:	Unknown
Substance	:	C.M.P.
Size	:	32.5 cm X 12 cm
Character	:	Nāgarī
Folia	:	2-16
Lines in a page	:	9
Letters in a line	:	59
Condition	:	Fair, torn, worm-eaten, incomplete
Date	:	Nil
Text begins	:	.....तेषु प्रत्यक्षमात्रवादिना चार्वाकेणाप्रतिपन्नः संदिग्धो विपर्य्यस्तो वायुमान्न शक्योव्युत्पादयितुं। न चार्वागदृशा प्रत्यक्षेण पुरुषातंरवर्त्तिनोऽज्ञान संदेह विपर्य्यया(द?) शक्याः....।
It ends	:	तत्रेष्टात्व स्मरणाच्च । अतस्तन्नित्य विभूतौ नास्य प्रभावः। न यत्र कालो निमित्यापरः प्रभुः कुतोनुदेवा जगतां य ईशिरे इत्यादि स्मृतेः ।
Colophon	:	इति बेदांतस्यमंतके कालतत्वनिरुपणः पंचमः किरणः। अथ कर्म निरुप्यते.............।

549

I.M. No 951

Title	:	वेदांततत्वसारम् (Vedāntatattvasāram)
By	:	Rāmānujācārya
Substance	:	C.M.P.
Size	:	22.5 cm X 10 cm
Character	:	Nāgarī
Folia	:	1-25
Lines in a page	:	8,9,10
Letters in a line	:	28

Condition : Fair, torn, worm-eaten, complete.

Date : Nil

Text begins : श्रीमतेरामानुजाय नमः।
सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यप्राद्वित्तीय शब्देन सजातीयादिभेदशून्यांगीकारेकथं तादृशाम्य(?) जगद्व्यापारः मायांगीकारेणेति चेत्किंतदानीं निर्विशेषज्ञानमात्रस्वरूपं.........।

It ends : ......पर इत्यादि श्रुति स्मृतिभिर्नारायणस्यैव परत्वं दिव्यकल्याणगुणयोगेन सगुणत्वं प्राकृतहेयगुणराहित्येन निर्गुणत्वमेति विषयं भेद वर्णनेन एकस्यैवावगमा-द्ब्रह्मद्वैविध्यं दुर्वचनमिति दिक्।

Colophon : इति श्रीरामानुजाचार्यविरचितं वेदांततत्वसारं सपूर्णं ॥

Post Colophon : लिखितं श्रीवैष्णव..........सुभं (शुभं?)

550

I.M. No 743

Title : वेदांताधिकरणरत्नमालावार्तिकः
(Vedāntādhikaraṇaratnamālāvārtikaḥ)

By : Subrahmaṇya, son of Nīlakaṇṭha

Substance : C.M.P.

Size : 30.5 cm X 12 cm

Character : Nāgarī

Folia : 1-16

Lines in a page : 12, 14

Letters in a line : 47

Condition : Old, torn, worm-eaten, complete

Date : Nil

Text begins : श्रीगणेशाय नमः ।
हृद्ध्वातगुण सूत्रादय ब्रह्मसूत्रोर्जितश्रियं ।
विश्वसद्व्यावहारार्थे वेदव्यासं हरिं भजे ॥

It ends : तद्व्याख्या खंडनं च श्रुत्यर्थ प्रकटीकृतिः ।
अस्मद्व्याख्या ततो ज्ञेयं नेहोक्तं विस्तृत्वज्ञः ।
इति चतुः सूत्रमिंद्रप्रतर्दन प्राणाधिकरणं प्रथमपा-
दांतिममेकादशं।

Colophon : इति श्री शारीरक ब्रह्ममीमांसा सूत्ररूप वेदांताधिकरण रत्नमालावार्तिके समन्वयाख्य प्रथमाध्याये स्पष्ट ब्रह्मलिंगक वाक्य समन्वयाख्यः प्रथमपाद एकत्रिंश-त्सूत्रात्मकैकादशाधिकरणात्मकः ।

551

I.M. No 948

Title : वेदांतरहस्यप्रकरणम्
(Vedāntarahasyaprakaraṇam)

By : Vedānta Vāgīśa Bhaṭṭācārya

Substance : C.M.P.

Size : 21 cm X 9 cm

Character : Nāgarī

Folia : 1-3

Lines in a page : 13,16

Letters in a line : 48

Condition : Old, torn, worm-eaten, complete.

Date : Saṁvat 1760

Text begins : श्रीगणेशाय नमः ।
निसर्ग सुंदरं दिव्यं सच्चिदानंदविग्रहं ।
वंदे वेदांत वागीशभट्टाचार्यः सुरेश्वरं ।१।
अथ वेदांतरहस्यमुच्यते । पदार्था द्विविधः। चैतन्यं जडंच । चैतन्यमप्यनेक विधं। तथाहि । एकमीश्व-रसंज्ञमायोपहितं ।

It ends : सर्वकर्माणि संचितानीत्यर्थः। न तु प्रारब्धानि तेषां भोगैकनाश्यत्वात्। प्रारब्धनाशनंतरमचिरेण प्राप्तस्वरूप विदेह कैवल्यो भवति।

Colophon : इति श्रीवेदांतवागीश भट्टाचार्यविरचितं वेदांत-रहस्याख्यं प्रकरणं समाप्तिमगमत्।

Post Colophon : लंहपु १७६०.........आशंल्हाष्कुंतषाष्कंट। शुभंभूयात्।

552

I.M. No 882

Title : विवेकचूडामणिः
(Vivekacūḍāmaṇiḥ)

By : Śaṅkarācārya

Substance : C.M.P.

Size : 23.5 cm X 10.5 cm

Character : Nāgarī

Folia : 1-67

Lines in a page : 7

Letters in a line : 22

Condition : Fair, torn, worm-eaten, complete.

Date : Nil

Text begins : श्रीगणेशाय नमः। श्रीनारायण समर्थ।
सर्ववेदांतसिद्धांतगोचरं तमगोचरं ।
गोविंदं परमानंदं सद्गुरुं प्रणतोऽस्म्यहं ।१।

It ends : संसाराध्वनि तापभानु किरण प्रोद्भूतदाहव्यथा खिन्नानां
जलकांक्षया मरुभुविश्रांत्यापरिभ्राम्यतां ॥
अत्यासन्नसुधांवुधिं सुखकरं ब्रह्माद्वयं दर्शय
त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ।
ॐ तत्सत्।

Colophon : इति श्रीमत् परमहंसपरिव्राजकाचार्य श्रीमद्गोविंद भगवत्पादशिष्य श्रीमच्छंकर भगवत्पाद कृतो विवेक चूडामणिः समाप्तः।

Post Colophon : राम राम। ग्रंथसंख्या ८००। श्रीगजाननार्पणमस्तु।
नारायण राम ॐ तत्सत।

553

I.M. No 10,869

Title	:	The same
By	:	Śaṅkarācārya
Substance	:	C.M.P.
Size	:	30.5 cm X 16.5 cm
Character	:	Bengali (Nāgarī)
Folia	:	1-69
Lines in a page	:	6
Letters in a line	:	33
Condition	:	Very fair, complete.
Date	:	Nil
Text begins	:	श्रीश्रीगुरवे नमः। सर्ववेदांतसिद्धांतगोचरं तमगोचरं। गोविंदं परमानंदं सद्गुरु प्रणतोऽस्म्यहं।१। जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता तस्माद्वैदिक धर्ममार्गपरता विद्वत्त्वमस्मात्परम्। आत्मानात्म विवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति- र्मुक्तिर्नोशतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥२॥
It ends	:	संसारध्वनि तापभानु किरण प्रोद्भूतदाहव्यथा । खिन्नानां जलकांक्षया मरुभुविश्रांत्यापरिभ्राम्यतां॥ अत्यासन्नसुधांवुधिं सुखकरं ब्रह्मादयं दर्शय त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥
Colophon	:	इति श्रीमत् परमहंसपरिब्राजकाचार्य श्रीमद्गोविंद भगवत्पूज्यपाद शिष्य श्रीमच्छंकर भगवत्पाद कृतो विवेकचूडामणिः समाप्तः।
Post Colophon	:	श्री काशीदास मित्रस्य हस्ताक्षरं द्वितीयवार लिखितं। सम्पूर्णोऽयं ग्रन्थः।

554

I.M. No 2912

Title : विवेकशतकम्
(Vivekaśatakam)
By : Pārāśarī Vaśiṣṭha Purī
Substance : C.M.P.
Size : 36.5 cm X 14.5 cm
Character : Nāgarī
Folia : 1-11
Lines in a page : 8
Letters in a line : 36
Condition : Fair, torn, worm-eaten, complete.
Date : Saṁvat 1939
Text begins : श्रीगणेशाय नमः ।
यस्यान्दितानिखिल लोक चराचराख्या, मोहे विमोहन कृतावरमायया ये॥
भोगेविमुक्तयमिनः परया पतन्ति विंदन्ति ते नु शवनन्नहि दुष्ट्याशं ॥१॥
It ends : धीरारप(?)न्तु स (सु?) तरां शतकं सुपद्यं ज्ञात्वारहस्यममलाब्जसुखं लभन्ताम्॥
मुर्खा हशन्तुचपलीकृत तुच्छवाचो, नित्यम्भवन्तु मलिनङ्किमका॑र्णवद्य(?)म्॥१०१॥
Colophon : श्री पारासरि वशिष्ठ पुरी विरचितम्विवेकशतकं स्वयमगात्॥
Post Colophon : लिखित.....सम्वत्॥ १९३९॥......शिव शिव।

555

I.M. No 2866

Title : विवेकमकरंदः
(Vivekamakarandaḥ)
By : Vāsudevendra (Vāsudeva yati)

Substance	:	C.M.P.
Size	:	30.5 cm X 15.5 cm
Character	:	Nāgarī
Folia	:	2-4
Lines in a page	:	11
Letters in a line	:	38
Condition	:	Fair, torn, incomplete.
Date	:	Nil
Text begins	:	.....रागोनाम ऐहिकानांस्त्रकचंदन-वनिताविषय फलभागादीनां कर्मजन्यतया यथा अनित्यत्वं तद्वदामुष्मिकानां अमृतादि विषफलभोगा-दीनामपि अनित्यत्वमिति तेभ्यो विषयेभ्यो नितरां विरक्तिः।
It ends	:	ज्ञानाग्नि सर्वकर्माणि मस्मसात् कुरुते तथा । एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाण मृछति । ज्ञानं लब्ध्वापरांशांतिमचिरेणाधिगछति ॥ इत्यादि श्रुतिस्मृतिभ्यः ।
Colophon	:	इति श्रीविवेकमकरंदाख्य समाप्तः ।

556

I.M. No. 8517

Title	:	विचारतरंगिणी (Vicāratarangiṇī (5th Taraṅga)
By	:	Kāśidāsa Mitra
Substance	:	C.M.P.
Size	:	24 cm X 15.5 cm
Character	:	Hindi
Folia	:	1-37, 48-63
Lines in a page	:	18, 21 & others
Letters in a line	:	20
Condition	:	Hindi bound ms, complete.

Date	:	Nil
Text begins	:	श्री श्रीगुरवे नमः ये चैतन्य आत्माके प्रकाशते जाग्रत स्वप्न सुषुप्ति तिनो अभस्था प्रकाश पावै है और अवस्थीं का वारवार आवागमनमे स्वप्रकाश स्वरुप विराजमान रहै है सो हि व्रह्म अद्वय अखंड एकरम हैं..........।
It ends	:	.....परम्परा उपदेश विना वस्तु ज्ञान हो वे नहि संसारमे सव पदार्थ चिह्ने के यदि रीति है नामो कहै हें जो लोकमे बदि वेदमेतत् ने भिन्न उपदेश औरं ज्ञान–इस मतको आश्रय करके सत् गुरुसे उपदेश ज्ञान लाभ करे तो स्वरूप प्राप्ति हो।
Colophon	:	इति श्रीकाशीदास मित्र विरचिते विचारतरंगिणी मे स्वरूप विचार नाम पंचमः तरंगः ।

557

I.M. No. 8517 (A)

Title	:	**विचारतरंगिणी** (Vicārataraṅgiṇī (11th Taraṅga)
By	:	Kāśīdāsa Mitra
Substance	:	C.M.P.
Size	:	24 cm X 15.5 cm
Character	:	Hindi
Folia	:	1-82
Lines in a page	:	17,19,20
Letters in a line	:	20
Condition	:	Fair, torn, complete.
Date	:	Saṁvat 1919
Text begins	:	श्री श्रीगुरवे नमः जिनचैतन्य के प्रकाशते जाग्रतस्वप्नसुषुप्ति तिनो अवस्था प्रकाश पावे है और अवस्थो को वारंवार के हेर फेर मे आप सदा समान रूप विराज रहे हें जिन्ह के ।

It ends	:	.....हम सच्चिदानंद परिपूर्ण अखंड द्वैतलेश का अवसरनाहे व्याप्य व्यापकता भास्य भासकता मिथ्या सर्वमात्मेति श्रुति शासन वेदांत प्रमाण नान्यदस्ति इति निश्चय स्वानुभूति सिद्ध सत्यं ज्ञानमानंदमद्वितीयं ब्रह्म नान्यत् कि विदीशत्।
Colophon	:	इति श्रीकाशीदास मित्र विरचिते विचारतरंगिण्यां शरीरपतन विषयनाम एकादश तरंग ।
Post Colophon	:	श्रीकाशीदास मित्र प्रणीतोयं ग्रन्थ समाप्तं । संवत् १९११।

558

I.M. No. 10,889

Title	:	**विज्ञाननौकास्तोत्रम्** (Vijñānanoukāstotram)
By	:	Śaṅkarācārya
Substance	:	C.M.P.
Size	:	32 cm X 13.5 cm
Character	:	Bengali (Nāgarī)
Folia	:	1
Lines in a page	:	10
Letters in a line	:	44
Condition	:	Fair, torn, damp, complete.
Date	:	Nil
Text begins	:	ॐ परमात्मने नमः । तपो यज्ञदानादिभिः शुद्धबुद्धि- र्विरक्तो नृपादौ पदे तुच्छबुद्ध्या। परित्यज्य सर्व्वं यदा आप्नोति तत्वं परं ब्रह्म नित्यं तदेवाहमस्मि॥१॥
It ends	:	स्वरुपानुसन्धान रुपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः

शृणोतीह वा नित्यम् उद्युक्त चित्तो
भवेद्विष्णुरत्रैव वेद प्रमाना(णा?)त् ॥

Colophon : इति श्रीमत् शंकराचार्यरचितं विज्ञाननौकास्तोत्रं संम्पूर्णं ।

Post Colophon : ॐ तत् सत् ।

559

I.M. No. 10,898

Title	:	The same
By	:	Śaṅkarācārya
Substance	:	C.M.P.
Size	:	34.5 cm X 13 cm
Character	:	Bengali (Nāgarī)
Folia	:	1-2
Lines in a page	:	17,19
Letters in a line	:	53
Condition	:	Fair, torn, damp, hazy, complete.
Date	:	Śakāvda 1800

Text begins : श्री श्रीगणेशाय नमः ।
प्राप्ता साधन वारिधारविमलं नित्यादिकर्थानलं
प्रज्ञारुपतयासु सुक्ष्मपरमाबुद्धिर्लता बर्द्धिता।
लब्धा वाक्यमहा प्रवेष्ट्य विटा(रा?)गं चिद्व्योम साग्रतः
ब्रह्मवृत्ति×××× प्रसून फलितं ब्रह्मास्म्यहं सत्फलं।

It ends : एतत् स्तोत्रस्य पठन श्रवण फलमाह। यो मनुष्य मनुष्यत्व भावापन्नः इदं स्वरुपानुसन्धानस्तुतिं भक्तिभावो आदरात गौरवात् पठेत् अथवा उदयुक्त चित्तः उत्साहीयत्न युक्त चित्तो वा शृणोति वेदप्रमाणात् अत्रैव जीवद्दशायां विष्णुर्व्यापको ब्रह्म भवेत् ब्रह्मवेद ब्रह्मैव भवति इति श्रुतेः।

Colophon : इति श्रीपरमहंसपरिव्राजकाचार्य पूज्यापाद श्रीभगवत् शंकराचार्य विरचिता विज्ञाननौकायाः टीका समाप्ता।

Post Colophon : काशिवाश्रि(सि?)त श्रीकाशीदास मित्र कृता......समाप्ता। शकाब्दा १८००।

560

I.M. No. 10,900

Title : The same
By : Śaṅkarācārya
Substance : C.M.P.
Size : 27.5 cm X 12 cm
Character : Bengali (Nāgarī)
Folia : 1
Lines in a page : 11
Letters in a line : 32
Condition : Fair, torn, complete.
Date : Nil
Text begins : ॐ नमः परमात्मने ।
तपो यज्ञदानादिभिः शुद्धबुद्धि-
विरक्तो नृपादौ पदे तुच्छबुद्ध्या।
परित्यज्य सर्व्वं यदाप्नोति तत्वं
परं ब्रह्म नित्यं तदेवाहमस्मि॥१॥
It ends : स्वरुपानुसन्धानरुपां स्तुतिं यः
पठेदादराद्भक्तिभावो मनुष्यः
शृणोतीह वा नित्यम् उद्युक्त चित्तो
भवेद्विष्णुरत्रैव वेद प्रमाणात् ॥९॥
Colophon : इति श्रीमच्छंकराचार्य्यरचितं विज्ञाननौकास्तोत्रं संम्पूर्णं ।

561

I.M. No. 10,909

Title : सटीक विज्ञाननौका (भावसेचनी)
(Vijñānanouka with ṭīkā Bhāvasecanī)
By : Śaṅkarācārya, *Com*-Kāśidāsa Mitra

Substance	:	C.M.P.
Size	:	35.5 cm X 14.5 cm
Character	:	Bengali (Nāgarī)
Folia	:	1-3
Lines in a page	:	8,11,13
Letters in a line	:	61
Condition	:	Fair, torn, damp, complete.
Date	:	Śakāvda 1800
Text begins	:	ॐ नमः परमात्मने तपो यज्ञदानादिभिः शुद्धबुद्धि र्विरक्तो नृपादौ पदे तुच्छबुद्ध्या। परित्यज्य सर्व्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥१॥
It ends	:	स्वरूपानुसन्धानरुपां स्तुतिं यः पठेदादराद्भक्ति भावो मनुष्यः । शृणोतीह वा नित्यमुद्युक्त चित्तो भवेद्विष्णुरत्रैव वेद प्रमाणात ॥९॥
Colophon	:	इति श्रीपरमहंसपरिव्राजकाचार्य पूज्यपाद श्रीमच्छं- कराचार्य विरचितं विज्ञाननौकाख्य स्तोत्रं संपूर्णं ।
Post Colophon	:	ॐ तत् सत् ।
Com. begins	:	श्री श्रीगणेशाय नमः । प्राप्ता साधन वारिधार विमलं नित्यादिकर्था (र्मा)नलं। प्रज्ञारूपतयासु सूक्ष्मपरमाबुद्धिर्लताबर्द्धिता ।
It ends, Com	:	इमां विज्ञाननौकाख्यां स्वरूपानुसन्धानरूपां स्तुतिं भक्तिभावंः,भक्तियुक्त(:?) सन् आदरात् गौरवात् पठेत् अथवा उद्युक्तचित्तः उत्साही यत्न युक्तचित्तः शृणोति अर्थ प्रविधानतः स अत्रैव इह जीवद्दशायां विष्णुर्व्यापको ब्रह्म भवेत् वेदप्रमाणात् यथा ब्रह्मवेदो ब्रह्मैव भवति इति श्रुतेः ।९।
Colophon	:	इति श्रीमच्छंकराचार्य पदपंकज किञ्जल्करसपानमोदित काशिकाश्रितः श्रीकाशीदास मित्र कृत विज्ञाननौकाया

भावसेचनी नाम्नी टीका समाप्ता।

Post Colophon : शकाब्दा १८००।

562

I.M. No. 174

Title : वैराग्याष्टशतकम्
(Vairāgyāṣṭaśatakam)

By : Somanātha

Substance : C.M.P.

Size : 23 cm X 14 cm

Character : Nāgarī

Folia : 1-19

Lines in a page : 10, 11, 12

Letters in a line : 25

Condition : Fair, torn, damp, complete

Date : Saṁvat 1827

Text begins : श्रीमन्महागणाधिपतये नमः।
आर्यासूनुसमानं प्रणम्य मानंघरासुरैः प्रवरैः।
सार्यानयातयालंमुद्गलमालंबदं कलये ॥१॥

It ends : बैराग्यं प्रासुकामं चतुरधिकतया मालयाधीगुणात्पापं-
चासत्पद्यपुष्ट्याद्विरकृति गिरि जानाथजा जा (या?)
निपु(?)जा ॥१०८॥

Colophon : इति वैराग्याष्टशतकं सकलकलोपनामक सोमनाथकृत
समाप्तिमापटीत ।

Post Colophon : यादृसं पुस्तकं दृष्टं तादृसं लिखितं मया ॥.......संवत्
१८२७......प्राणविगमः ।

563

I.M. No. 2868

Title : शतदूषणी
(Śatadūṣaṇī)

By : Śrīnivāsa Rāsa
Substance : C.M.P.
Size : 31.5 cm X 17 cm
Character : Nāgarī
Folia : 2-7
Lines in a page : 17
Letters in a line : 53
Condition : Fair, torn, worm-eaten, incomplete
Date : Nil
Text begins : ....र्वचनीयाज्ञानगंधोपीति अपिच यदि मायाविद्यायुक्तं सदेव जगत् कारणमभिमतं तर्हिसर्वाभावप्रतिपादना संगतिः सन्मात्र प्रतिपादने तु तद्धीदंतर्ह्यव्या-कृतमासीत(त्त?)न्नाम रूपाभ्यां व्याक्रि यत्.......।
It ends : अतो ब्रह्मविद्ब्रह्मैवेति श्रुतेर्मुक्तस्य ब्रह्मसाम्य एव स्वारस्यमित्यलं दिष्ट हतमुद्गराघाते नेति एवं संहस्यावधि-दूषणानि संति मया तु स्थाली शिवश्रूत्या येन दिङ्मात्रमुक्तमिति आलोच्य दैशिकग्रंथान् विचार्य च पुनः पुनः दूषणानां शतं दत्तं केवलाद्वैत दर्शने।
Colophon : इति श्रीमन्नारायणचरणनलिनद्विरेफाणां वादीभक्तेशरीणां(?) श्रीमद्वेंकटाचार्याणां चरणारविंद मधुपेन श्रीनिवास रा (दा?) सेन विरचिता शतदूषणी समाप्तिमगात्।
Post Colophon : शुभमस्तु............जननेन किम् ॥

564

I.M. No. 717

Title : **शारीरकमीमांसा रत्नप्रभाभाष्यसहिता** (Śārīrakamīmāṁsā with Ratnaprabhā-bhāṣya)
By : *Text*-Śaṅkara Bhagavatpāda, *Com*: Govindānanda Bhagavat.

Substance	:	C.M.P.
Size	:	33 cm X 13 cm
Character	:	Nāgarī
Folia	:	Different pagination for 4 Adhyāyas of the text.
Lines in a page	:	Different
Letters in a line	:	62
Condition	:	Torn, mouse-eaten. Some complete / incomplete some.
Date	:	Nil
Text begins	:	युष्मदस्मत् प्रत्ययगोचरयोर्विषय विषयिणोस्तमः प्रकाशवत् विरूद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां...।
It ends, text, 44Page (4thAdhyāya, 4th pāda)	:	.....तदाश्रयणे नैव हि सगुण शरणानामप्यनावृति सिद्धिरिति अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्र परिसमाप्तिं द्योतयति ॥
Colophon	:	इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकर-भगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः॥
Com begins 3A *1stAdhyāya(1st Pāda)*	:	एवमर्थाद्ब्रह्मज्ञानाज्जीव गतानर्थभ्रमनिवृतिफल सूचयन् जीव ब्रह्मणोरैक्यं विषयमप्यर्थान्सूचयति, अन्यज्ञानादन्यत्रभ्रमानिवृतेः...।
It ends, Com, 44 Page	:	......च्कल्पाद्दितीयं हृदिकृतमर्चना भाष्य रत्नप्रभाख्या स्वात्मानंदैक लुब्धारघुवर चरणांभोजयुग्म प्रपन्ना ।
Colophon	:	इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोपाल सरस्वती पूज्यपाद शिष्य श्रीगोविंदानंद भगवत् कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थस्या-ध्यायस्य चतुर्थः पादः ।

565

I.M. No. 1430

Title : शारीरकमीमांसाभाष्य (प्रथमाध्यायात् चतुर्थाध्याय पर्यंत)
(Śarīrakamīmāṁsābhāṣya (1st Adhyāya to 4th Adhyāya)

By : Śaṅkara Bhagavatpāda

Substance : C.M.P.

Size : 28.5 cm X 13.5 cm

Character : Nāgarī

Folia : 2-136, 1-110, 1-92, 1-39

Lines in a page : 11,12

Letters in a line : 43

Condition : Fair, incomplete.

Date : Nil

Text begins : ....प्रत्यगात्मनोऽविषयत्वं ब्रवीषि उच्यते न तावदयमेकांतेनाविषयोऽस्मत्प्रत्ययविषयत्वादपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयांतरमध्यसितव्यमिति....।

It ends, 4th Adhyāya : .....परमित्यत्र सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्ध निर्वाणपरायणानां सिद्धैवानावृत्तिः। तदाश्रयणेनैव हि सगुणपरायणानामप्यनावृत्तिसिद्धिरिति। अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon : इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थफलाध्यायस्य चतुर्थपादः।

566

I.M. No. 2911

Title : शारीरकमीमांसा /ब्रह्मसूत्र
(Śārīrakamīmāṁsā / Brahmasūtra)

By : Bādarāyaṇa

Substance	:	C.M.P.
Size	:	32.5 cm X 16.5 cm
Character	:	Nāgarī
Folia	:	1-6
Lines in a page	:	17, 18
Letters in a line	:	35
Condition	:	Fair, torn, damp, worm-eaten, complete
Date	:	Saṁvat 1877
Text begins	:	श्रीरामकृष्णाभ्यां नमः। अथातो ब्रह्मजिज्ञासा१ जन्माद्यस्ययतः २ शास्त्रयोनित्वात् ३ तत्तु समन्वयात् ४ ईक्षतेर्नाशब्दं (?)५ गौणश्चेन्नात्मशब्दात्६ तन्निष्ठस्य मोक्षोपदेशात्७ हेयत्वावचनाच्च८ स्वाप्ययात्९ गतिसामान्यात्१०।
It ends	:	स्वाप्यय संपत्तौ (त्ते?) रन्यतरापेक्षमाविष्कृतं हि१६ जगद्व्यापारवर्ज्जं प्रकरणाद सन्निहितत्वाच्च१७ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः१८ विकारावर्त्तिच तथा हि स्थितिमाह दर्शयतश्चैवं प्रत्यक्षाऽनुमाने२० भोगमात्रसाम्य लिङ्गाच्च२१ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् २२
Colophon	:	इति श्रीमच्छारीरकमीमांसा चतुर्थाध्याये चतुर्थो पादः।
Post Colophon	:	अधिकरण..........संवत् १८७७।

567

I.M. No. 7167

Title	:	शारीरकभाष्यन्यायनिर्णयः (Śārīrakabhāṣyanyāyanirṇayaḥ)
By	:	Ānandajñāna
Substance	:	C.M.P.
Size	:	27.5 cm X 11.5 cm
Character	:	Nāgarī
Folia	:	287 by counting

Lines in a page : 9,10,12

Letters in a line : 33

Condition : Very old, damaged by worm-eaten, pages brittle, incomplete.

Date : Nil

Text begins : ......प्रकृत सिद्धार्थ मुपोद्घातं विदुर्बुधाः इति न्यायेन श(शा?)स्त्रेण संबध्यते। विचारारंभोपयोगिनीनां अधिकार्यादि श्रुतीनां स्वार्थे समन्वयोक्तेरस्य विशेषतः समन्वयाध्याय संगतिः।

568

I.M. No. 10,608

Title : **शारीरकमीमांसाभाष्यम्** (Śārīrakamīmāṁsābhāṣyam)

By : Śaṅkarācārya, *Com*-Ānandajñāna

Substance : C.M.P.

Size : 33 cm X 16.5 cm

Character : Nāgarī

Folia : 2-5, 7-16, 1-15, 9-11, 13-35, 25-35 and 1 extra.

Lines in a page : 15,16,17,18

Letters in a line : 54

Condition : Bad, damp, damaged by worm-eaten, pages are not in order, incomplete.

Date : Nil

Text begins : कूटस्थ हि कार्यकरणाधिपतेः प्रसिद्धो मन आदिभिः सम्बन्धः न परस्य ब्रह्मणः..........।

It ends, 1st pāda of 2nd Adhyāya :

.....स्वपक्ष परिग्रह प्रधानं प्रकरणमुपसंहरति यस्मादस्मिन्ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते सर्वज्ञ सर्वशक्ति

महामार्य(?) च तद्ब्रह्मेति तस्मादनति शंकनीयमिदमौपनिषदं दर्शनमिति ।

Colophon : इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविंद भगवत्पूज्यपादशिष्य शंकरभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य प्रथमः पादः।

Com begins 2A : ....विश्वजिन्न्यायेन सर्वाभीष्टं ब्रह्मैव मनोमयादौ विशेष्याकांक्षायामुपास्ति सम्बन्धीत्याह। कुत इति। विशेष्याकांक्षायामपि जीव एव लिङ्गबलीयस्तया सम्बध्यते इत्याहुः। तस्येति ।

It ends, com : यस्मादित्यस्यापेक्षितं पूर्वं यत्पदार्थमुपसंहरति तस्मादिति स्मृति न्यायविरोधः समन्वयस्य नास्तीति सिद्धमिति वक्तुमिति शब्दः।

Colophon : इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुद्धानन्द पूज्यपादशिष्य भगवदानन्दज्ञान विरचिते श्रीमच्छारीरकभाष्यन्यायनिर्णये द्वितीयस्याध्यायस्य प्रथमः पादः।।

569

I.M. No. 1223

Title : The same

By : Ānandajñāna

Substance : C.M.P.

Size : 27.5 cmX 10.5 cm

Character : Nāgarī

Folia : 1-245

Lines in a page : 9,10,13

Letters in a line : 54

Condition : Very old, torn, damaged by worm-eaten, damp, incomplete.

Date : Nil

Text begins : श्रीगणेशाय नमः। अतिदेशाधिकरणे प्रधानवद् शब्दत्वं परमाण्वादीनामपीत्युक्तं संप्रति प्रधानस्य वैदिक

शब्दवत्वाभावेपि स्मृतिरुप शब्दवत्वमाशंक्य परिहरति स्मृतीति। (प्रथमाध्यायस्य तृतीय पाद पर्यंतं)

Begins 2-44 : .....हेतुत्वेन सुत्रपदमवतारयितुं पृछति कुत इति सुत्रपदं हेतुमादाय व्याचष्टे स्मृतीति। तन्मते व्युत्पाद्यंते तत्वान्यनेनेति तंत्रं तंत्रमित्याख्यायस्य सा तथेति। (द्वितीयाध्यायस्य द्वितीयपादः)

Begins 1-280 : .....ब्रह्मणि जगत्कारणत्व गुतोषु (गतेषु?)। सर्वज्ञत्वादिषुक्तेषु प्रधानेपि तदुपपत्तिमाशंक्योक्तं स्वतानुपपत्तेश्चेति। पूर्वपादेन समन्वयेवादिभि उत्प्रेक्षिता विलक्षणत्वादयो दोषा निरस्ताः संप्रतिपरपक्षाणां भ्रांतिमूलत्वं वक्तुं पादांतरमारभ्यते। (द्वितीयाध्यायस्य द्वितीय पादात् चतुर्थाध्यायस्य तृतीयपाद पर्यंतं)

Begins 5-162 : .....न तदुपादानं यथा गंध इति न्यायेन विरुध्यते न वेति पूर्ववदेव संदेहे वृत्तमनु संगतिमाह चेत् न मित्यादिना निर्गुणस्य गंधवदुपादानत्वायोगाद्ब्रह्मणः ...। (द्वितीयाध्यायस्य द्वितीय, तृतीय तथा चतुर्थाध्यायस्य कति पत्राणि)

570

I.M. No. 4929

Title : **शारीरकन्यायरक्षामणिः** (Śārīrakanyāyarakṣāmaṇiḥ)

By : Appaya Dīkṣita

Substance : C.M.P.

Size : 30 cm X 10.5 cm

Character : Nāgarī

Folia : 2-72

Lines in a page : 11, 12

Letters in a line : 34

Condition : Old, torn, damp, damaged by worm eaten, incomplete.

Date	:	Nil
Text begins	:	....स्य प्रन्नणि तथा पौर्णमायाः परमतः सरुन्माने-त्यधिकरणे व्यवस्थापितत्वात्। अमृतत्वस्य धारक इत्यन्वय संघटनाच्च न तु पारवत्वेन प्रधाने गौणता युक्ता अमृतस्य पारवानित्यं......।
It ends 72B	:	......इति श्रीमद्भाष्योक्तरीत्या समर्पितं प्राक् एतत्सत्यं ब्रह्मपुरमित्येतच्च वस्तुतोदहराकोशस्य ब्रह्मद्वयतां परत्व एव द्वितीयाक्षेपस्योत्तरं भवेदित्यपि समार्पितं अपहतपाशत्वाध्यास भवति दहरं(?) विपाप्यमिति श्रुताचेत् न सा ।

571

I.M. No. 402

Title	:	शास्त्रप्रदीपिका (सुरेश्वरवार्त्तिक टीका) (Śāstrapradīpikā (Sureśvaravārttika ṭīkā)
By	:	Commentator-Ānandajñāna
Substance	:	C.M.P.
Size	:	25 cm X 11 cm
Character	:	Nāgarī
Folia	:	1-82 (5th)2-255 (6th)
Lines in a page	:	6,7
Letters in a line	:	10,11
Condition	:	Old, torn, hazy, pasted, incomplete, Only two chapters V & VI
Date	:	Nil
Text begins	:	(Folia 1 not readable) : क्तमर्थं यथा श्रुतमधिगमयंतीति। अन्योऽप्यातया प्रमाणोपपत्त्येति कर्त्तव्य तया प्रमाण विषय......। The last page of 6th chapter is fully illegible and damp.

572

I.M. No. 2685

Title	:	शास्त्रसिद्धांतलेशः, कृष्णालंकारव्याख्या सह (Śāstrasiddhāntaleśaḥ with Kṛṣṇālaṁkāra vyākhyā)
By	:	Appaya Dīkṣita, *Com*-Acyutakṛṣṇānandatīrtha
Substance	:	C.M.P.
Size	:	33 cm X 15.5 cm
Character	:	Nāgarī
Folia	:	1-38
Lines in a page	:	16,18
Letters in a line	:	66
Condition	:	Old, torn, worm-eaten, complete only 2nd Pariccheda.
Date	:	Śakāvda 1845
Text begins	:	श्रीगणेशाय नमः। अथ कथमद्वितीये ब्रह्मणि वेदांतानां समन्वय प्रत्यक्षादि विरोधादिति चेन्न आरंभणाधिकरणोदाहृत..........।
It ends	:	.....तस्मादचेतनप्रपंचस्य मिथ्यात्वाच्चेतन प्रपंचस्य ब्रह्मा भेदाच्च न वेदांतानामद्वितीये ब्रह्मणि विद्यैक प्राच्ये समन्वयस्य कश्चिद्विरोधः
Colophon	:	इति शास्त्रसिद्धांतलेशसंग्रहे द्वितीयः परिछेदः।
Com. begins	:	ॐ श्रीमहागणपतये नमः । श्रीरामचंद्राय नमः । यो मे विश्वेश्वर क्षेत्रं विश्वेश्वर समोगुरुः। समध्यास्ते स्वयंज्योतिर्वाणां संज्ञो भजामि तं ॥ स्वयं प्रकाशसरस्वती संज्ञ इत्यर्थः.......।
It ends, Com	:	.....अद्वितीये ब्रह्मणि वेदांत समन्वयाविरोधं समर्थन रूपं परिछेदार्थमुपसंहरति तस्मादिति पंचम्यंत पंचमाभ्यां विवृणोति अचेतनस्येति ।
Colophon	:	इति श्रीमत् परमहंसपरिब्राजकाचार्य श्रीमत् स्वयं

प्रकाशानंदसरस्वती दिव्य श्रीचरणारविंदसंलग्न रजोभूतस्याच्युतकृष्णानंदतीर्थकृतौ शास्त्रसिद्धांतलेश संग्रह व्याखायां कृष्णालंकाराख्या द्वितीय परिछेद समाप्तः।

Post Colophon : सम्वत् १८४५ आषाडसुदि ।

573

I.M. No. 4839

Title	:	The same
By	:	Appaya Dīkṣita
Substance	:	C.M.P.
Size	:	35 cm X 13.5 cm
Character	:	Nāgarī
Folia	:	2-33
Lines in a page	:	15, 20
Letters in a line	:	66
Condition	:	Old, torn, worm-eaten, damp, pasted, incomplete.
Date	:	Saṁvat 1744
Text begins	:	.....नियमं विना क्षे(उ?)पलभ्यस्य नख बिदलनादेर्निवर्त्तयितुमशक्यतयाऽप्राप्तांशपरिपूरणरूपस्य नियमस्यप्राथम्याद्विधेयावहन् न गतत्वेन प्रत्यासन्नलब्ध तस्यैव नियम विधिफलत्वोपगमात्....।
It ends	:	.....तदनुगुणकलापविशिष्टनिरतिशयानंदस्फुरणसमृद्धनिः संधिबंध (संबन्ध?) परमेश्वरभावापत्तिरादर्त्तव्येति सिद्धं । इति शास्त्र सिद्धांतलेशसंग्रहे चतुर्थः परिछेदः.......। तंत्राण्यधीत्य सकलानि सदावदात व्याख्यान कौशल कला विशदीकृतानि । आम्नाय मूलमनुरुध्य च संप्रदाय सिद्धांत भेदलव संग्रहमित्यकार्षीत् ॥

सिद्धांतरीतिषु मयाभ्रमदुषितेन
स्यादन्यथापि लिखितं यदि किंचिदस्य ।
संशोधने सहृदयाः सदया भवंतु
सत्त् संप्रदाय परिशीलान् निर्विशंकाः॥

Colophon : इति श्रीमदप्पय दीक्षित कृत शास्त्रसिद्धांतलेशसंग्रहः संपूर्णः ।

Post Colophon : शुभमस्त । संवत् १७४४........शुभंभवतु॥

574

I.M. No. 4845

Title : **स्वरूपनिर्णयः**
(Svarūpanir̈ṇayaḥ)

By : Sadānanda

Substance : C.M.P.

Size : 33 cm X 13 cm

Character : Nāgarī

Folia : 1-19

Lines in a page : 12, 13, 18

Letters in a line : 53

Condition : Old, torn, damp, worm-eaten, hazy, pasted, complete.

Date : Saṁvat 1743

Text begins : श्रीगणेशाय नमः । शिवः सर्वं।
यस्मिन् बुद्बुदवद्विश्वं भिन्नाभिन्नमिव स्थितं।
तं बंदे परमानंदं तुरीयं साक्षिणं सदा ।१।
इह खलु सकल लोक हितैषी भगवान् वेदव्यासो मुमुक्षुन् अनात्मेभ्यो विवेकेन नित्यशुद्ध बुद्धमुक्तस्वभाव-मात्मानं बोधयितुं सूत्राणि प्रणिनाय।

It ends : तीर्थेश्वपच गृहे वा नष्टस्मृतिरपि परित्यज्यं देहं ज्ञानसमकालमुक्तः कैवल्यं याति हृतशोक इति पातंजल..प्य(?)वचनाच्चेति विवेकः तस्मात्सिद्धं

		चतुर्थ भूमिकावस्थांगतस्याष्टांगयोगं विनाऽपि कैवल्यमिति शिवं॥
